## षष्ठाध्यायस्य तृतीयः पादः

### अलुगुत्तरपदे । (१/९५८)

अलुक् इति च, उत्तरपदे इति च एतदधिकृतं वेदितव्यम् । यद् इत ऊर्ध्वमनुक्रमिष्यामोऽलुगुत्तरपदे इत्येवं तद् वेदितव्यम् । वक्ष्यति – 'पञ्चम्याः स्तोकादिभ्यः' (६. ३. २/९५९)[1] । स्तोकान्मुक्तः । [2]अल्पान्मुक्तः (म. भा. ३. १४१) । उत्तरपदे इति किम् ? निष्क्रान्तः स्तोकात् निस्तोकः । अन्यार्थमिदमुत्तरपदग्रहणमिहाप्यलुको निवृत्तिं करोति इत्येवमर्थं लक्षणप्रतिपदोक्तपरिभाषा (व्या. प. ३) नाश्रयितव्या[3] । अलुगधिकारः प्रागानङः (६. ३. २५/९२१) । उत्तरपदाधिकारः प्रागङ्गाधिकारात् (६. ४. १/२००) ॥

### पञ्चम्याः स्तोकादिभ्यः । (२/९५९)

स्तोकान्तिकदूरार्थकृच्छ्राणि स्तोकादीनि, तेभ्यः परस्याः पञ्चम्याः उत्तरपदे अलुक् भवति । स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः । [4]अभ्याशादागतः । [5]दूरादागतः । [6]विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । समासे कृते प्रातिपदिकत्वात् सुपो लुकि प्राप्ते प्रतिषेधः क्रियते । द्विवचनबहुवचनान्तानां तु स्तोकादीनामनभिधानात् समास एव न भवति स्तोकाभ्यां मुक्तः, स्तोकेभ्यो मुक्तः [7]इति । तेनात्र न कदाचिदैकपद्यमैकस्वर्यं च भवति ।

[७१६] ब्राह्मणाच्छंसिन उपसङ्ख्यानं कर्तव्यम् । (म. भा. ३. १४२)

[8]ब्राह्मणादादाय शंसति इति ब्राह्मणाच्छंसी [9]इति । ऋत्विग्विशेषस्य[10] रूढिरियम् । [11]तस्य व्युत्पत्तिरसता सता वावयवार्थेन क्रियते ॥

### ओजःसहोऽम्भस्तमसस्तृतीयायाः । (३/९६०)

ओजस् सहस् अम्भस् तमस् इत्येतेभ्य उत्तरस्याः तृतीयायाः अलुक् भवति उत्तरपदे[12] । ओजसाकृतम् । सहसाकृतम् । [13]अम्भसाकृतम् । तमसाकृतम् ।

[७१७] अञ्जस उपसङ्ख्यानम् । (म. भा. ३. १४२)

अञ्जसाकृतम् ।

[७१८] पुंसानुजो जनुषान्ध इति [14]वक्तव्यम् । (म. भा. १४२)

पुंसानुजः । जनुषान्धः ।

---

1. इति इत्यधिकम् फ. 2. उदाहरणमिदं नास्ति फः 3. भवति इत्यधिकम् फ. 4. कृच्छ्रादागतः फ. 5–6. नास्ति फ. 7. नास्ति फ. 8. ब्राह्मणानि शंसति इति फ. 9. नास्ति फ. 10. कस्यचिद् इत्यधिकम् ब. क. ड. 11. तस्मात् फ. 12. परतः इत्यधिकम् फ. 13. उदाहरणमिदं नास्ति फ. 14. उपसङ्ख्यानम् फ.